श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## रुद्र गीत



शिव शंकर की निर्मल प्रीत
है कृष्ण आराधन रुद्र गीत

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्**

### श्रीमद्भागवतमहापुराणम्

### चतुर्थः(स्) स्कंधः

### अथ चतुर्विंशोऽध्यायः

**मैत्रेय उवाच**

**विजिताश्वोऽधिराजाऽऽसीत्-पृथुपुत्रः(फ्) पृथुश्रवाः।**
**यवीयोभ्योऽददात्काष्ठा, भ्रातृभ्यो भ्रातृवत्सलः॥ (1)**

विजिताश्वोऽ + धिराजाऽऽ + सीत् , यवी + योभ्योऽ + ददात् + काष्ठा

हर्यक्षायादिशत्प्राचीं(न्), धूम्रकेशाय दक्षिणाम्।
प्रतीचीं(म्) वृकसं(ञ्)ज्ञाय, तुर्यां(न्) द्रविणसे विभुः॥ (2)

हर्य + क्षाया + दिशत् + प्राचीं(न्), वृक + सं(ञ्)ज्ञाय

अन्तर्धानगतिं(म्) शक्राल्-लब्ध्वान्तर्धानसं(ञ्)ज्ञितः।
अपत्यत्रयमाधत्त, शिखण्डिन्यां(म्) सुसम्मतम् ॥ (3)

अन्तर् + धानगतिं(म्), लब्ध्वान्तर् + धान + सं(ञ्)ज्ञितः

अपत् + यत्र + यमा + धत्त, शिखण् + डिन्यां(म्), सुसम् + मतम्

पावकः(फ्) पवमानश्च, शुचिरित्यग्नयः(फ्) पुरा।
वसिष्ठशापादुत्पन्नाः(फ्), पुनर्योगगतिं(ङ्) गताः॥ (4)

शुचि + रित्यग् + नयः(फ्), वसिष्ठ + शापा + दुत्पन्नाः(फ्), पुनर् + योग + गतिं(ङ्)

अन्तर्धानो नभस्वत्यां(म्), हविर्धानमविन्दत।
य इन्द्रमश्वहर्तारं(म्), विद्वानपि न जघ्निवान्॥ (5)

नभस् + वत्यां(म्), हविर् + धानम + विन्दत, इन्द्र + मश्व + हर्तारं(म्)

राज्ञां(म्) वृत्तिं(ङ्) करादान- दण्डशुल्कादिदारुणाम्।
मन्यमानो दीर्घसत्र- व्याजेन विससर्ज ह॥ (6)

दण्ड + शुल्कादि + दारुणाम्

तत्रापि हं(व्)सं(म्) पुरुषं(म्), परमात्मानमात्मदृक्।
यजं(व्)स्तल्लोकतामाप, कुशलेन समाधिना॥ (7)

परमात्मा + नमात् + मदृक्, यजं(व्) + स्तल् + लोकता + माप

हविर्धानाद्धविर्धानी, विदुरासूत षट् सुतान्।
बर्हिषदं(ङ्) गयं(म्) शुक्लं(ङ्),कृष्णं(म्) सत्यं(ञ्) जितव्रतम्॥ (8)

हविर् + धानाद् + धविर्धानी

बर्हिषत् सुमहाभागो, हाविर्धानिः(फ्) प्रजापतिः।
क्रियाकाण्डेषु निष्णातो, योगेषु च कुरूद्वह॥ (9)

सुमहा + भागो, कुरूद् + वह

यस्येदं(न्) देवयजन-मनु यज्ञं(म्) वितन्वतः।
प्राचीनाग्रैः(ख्) कुशैरासी-दास्तृतं(म्) वसुधातलम् ॥ (10)

कुशै+ रासी

सामुद्रीं(न्) देवदेवोक्ता-मुपयेमे शतद्रुतिम्।
यां(म्) वीक्ष्य चारुसर्वाङ्गीं(ङ्), किशोरीं(म्) सुष्ठ्वलङ्कृताम्।
परिक्रमन्तीमुद्वाहे, चकमेऽग्निः(श्) शुकीमिव॥ (11)

देव + देवोक्ता, चारु + सर्वाङ्गीं(ङ्), सुष्ठ्‌ + वलङ् + कृताम्, परि + क्रमन्ती + मुद्वाहे

विबुधासुरगन्धर्व-मुनिसिद्धनरोरगाः।
विजिताः(स्) सूर्यया दिक्षु, क्वणयन्त्यैव नूपुरैः॥ (12)

विबुधा + सुर + गन्धर्व, मुनि + सिद्ध + नरोरगाः, क्वण + यन्त्यैव

प्राचीनबर्हिषः(फ्) पुत्राः(श्), शतद्रुत्यां(न्) दशाभवन्।
तुल्यनामव्रताः(स्) सर्वे, धर्मस्नाताः(फ्) प्रचेतसः॥ (13)

प्राचीन + बर्हिषः(फ्), तुल्य + नाम + व्रताः(स्)

पित्राऽऽदिष्टाः(फ्) प्रजासर्गे, तपसेऽर्णवमाविशन् ।
दशवर्षसहस्राणि, तपसाऽऽर्चं(व्)स्तपस्पतिम्॥ (14)

तपसेऽर्ण+ वमा+ विशन्, दश+ वर्ष+ सहस्राणि , तपसाऽऽर् + चं(व्)स् + तपस्पतिम्

यदुक्तं(म्) पथि दृष्टेन, गिरिशेन प्रसीदता।
तद्ध्यायन्तो जपन्तश्च, पूजयन्तश्च सं(य्)यताः॥ (15)

तद्ध्या + यन्तो

## विदुर उवाच

प्रचेतसां(ङ्) गिरित्रेण, यथाऽऽसीत्पथि सङ्गमः।
यदुताह हरः(फ्) प्रीतस्- तन्नो ब्रह्मन् वदार्थवत् ॥ (16)

यथाऽऽ+ सीत् + पथि

सङ्गमः(ख्) खलु विप्रर्षे, शिवेनेह शरीरिणाम्।
दुर्लभो मुनयो दध्यु, रसङ्गाद्यमभीप्सितम्॥ (17)

रसङ्गा + द्यम + भीप्सितम्

आत्मारामोऽपि यस्त्वस्य, लोककल्पस्य राधसे।
शक्त्या युक्तो विचरति, घोरया भगवान् भवः॥ (18)

आत्मा + रामोऽपि, यस् + त्वस्य

## मैत्रेय उवाच

प्रचेतसः(फ्) पितुर्वाक्यं(म्), शिरसाऽऽदाय साधवः।
दिशं(म्) प्रतीचीं(म्) प्रययुस्- तपस्यादृतचेतसः॥ (19)

पितुर् + वाक्यं(म्), तपस्या + दृत + चेतसः

समुद्रमुप विस्तीर्ण- मपश्यन् सुमहत्सरः।
महन्मन इव स्वच्छं(म्), प्रसन्नसलिलाशयम्॥ (20)

प्रसन्न + सलिला + शयम्

नीलरक्तोत्पलाम्भोज-कह्लारेन्दीवराकरम्।
हं(व्)ससारसचक्राह्व-कारण्डवनिकूजितम्॥ (21)

नील + रक्तोत् + पलाम्भोज ,कह्ला + रेन्दी + वराकरम् , हं(व्)ससार + सचक्राह्व

मत्तभ्रमरसौस्वर्य- हृष्टरोमलताङ्घ्रिपम्।
पद्मकोशरजो दिक्षु, विक्षिपत्पवनोत्सवम्॥ (22)

मत्त + भ्रमर + सौस्वर्य, हृष्ट + रोम + लताङ्घ्रिपम्, विक्षिपत् + पवनोत् + सवम्

तत्र गान्धर्वमाकर्ण्य, दिव्यमार्गमनोहरम्।
विसिस्म्यू राजपुत्रास्ते, मृदं(ङ्)गपणवाद्यनु॥ (23)

गान्धर्व + माकर्ण्य, दिव्य + मार्ग + मनोहरम् , मृदं(ङ्) + गपण + वाद्यनु

तर्ह्येव सरसस्तस्मान्-निष्क्रामन्तं(म्) सहानुगम्।
उपगीयमानममर-प्रवरं(म्) विबुधानुगैः॥ (24)

सरसस्+ तस्मान्, उपगीय+ मान+ ममर

तप्तहेमनिकायाभं(म्), शितिकण्ठं(न्) त्रिलोचनम्।
प्रसादसुमुखं(म्) वीक्ष्य, प्रणेमुर्जातकौतुकाः॥ (25)

तप्त+ हेम+ निकायाभं(म्), प्रणेमुर् + जात+ कौतुकाः

स तान् प्रपन्नार्तिहरो, भगवान्धर्मवत्सलः।
धर्मज्ञान् शीलसम्पन्नान्, प्रीतः(फ्) प्रीतानुवाच ह॥ (26)

प्रपन् + नार्ति + हरो, शील + सम्पन् + नान्

## श्रीरुद्र उवाच

यूयं(म्) वेदिषदः(फ्) पुत्रा, विदितं(म्) वश्चिकीर्षितम्।
अनुग्रहाय भद्रं(म्) व, एवं(म्) मे दर्शनं(ङ्) कृतम्॥ (27)

वश्चि + कीर्षितम्

यः(फ्) परं(म्) रं(व्)हसः(स्) साक्षात्-त्रिगुणाज्जीवसंज्ञितात्।
भगवन्तं(म्) वासुदेवं(म्), प्रपन्नः(स्) स प्रियो हि मे॥ (28)

त्रिगुणाज् + जीव + संज्ञितात्

स्वधर्मनिष्ठः(श्) शतजन्मभिः(फ्) पुमान्,
विरिञ्चतामेति ततः(फ्) परं(म्) हि माम्।
अव्याकृतं(म्) भागवतोऽथ वैष्णवं(म्),
पदं(म्) यथाहं(म्) विबुधाः(ख्) कलात्यये॥ (29)

विरिञ् + चता + मेति

अथ भागवता यूयं(म्), प्रियाः(स्) स्थ भगवान् यथा।
न मद्भागवतानां(ञ्) च, प्रेयानन्योऽस्ति कर्हिचित्॥(30)

मद्+ भागवता + नां(ञ्),प्रेया + नन्योऽस्ति

इदं(म्) विविक्तं(ञ्) जप्तव्यं(म्), पवित्रं(म्) मं(ङ्)गलं(म्) परम्।
निः(श्)श्रेयसकरं(ञ्) चापि, श्रूयतां(न्) तद्वदामि वः॥(31)

तद् + वदामि

मैत्रेय उवाच

इत्यनुक्रोशहृदयो, भगवानाह तान् शिवः।
बद्धाञ्जलीन् राजपुत्रान्-नारायणपरो वचः॥(32)

इत्यनु + क्रोश + हृदयो

श्रीरुद्र उवाच

जितं(न्) त आत्मविद्धुर्य-स्वस्तये स्वस्तिरस्तु मे।
भवता राधसा राद्धं(न्), सर्वस्मा आत्मने नमः॥(33)

आत्म + विद्धुर्य

नमः(फ्) पङ्कजनाभाय, भूतसूक्ष्मेन्द्रियात्मने।
वासुदेवाय शान्ताय, कूटस्थाय स्वरोचिषे॥(34)

भूत + सूक्ष्मेन्द्रि + यात्मने

सङ्कर्षणाय सूक्ष्माय, दुरन्तायान्तकाय च।
नमो विश्वप्रबोधाय, प्रद्युम्नायान्तरात्मने॥ (35)

प्रद्युम्ना + यान्त + रात्मने

नमो नमोऽनिरुद्धाय, हृषीकेशेन्द्रियात्मने।
नमः(फ्) परमहं(व्)साय, पूर्णाय निभृतात्मने॥(36)

हृषी + केशेन्द्रि + यात्मने

स्वर्गापवर्गद्वाराय, नित्यं(म्) शुचिषदे नमः।
नमो हिरण्यवीर्याय, चातुर्होत्राय तन्तवे॥(37)

स्वर्गा + पवर्ग + द्वाराय

नम ऊर्ज इषे त्रय्याः(फ्), पतये यज्ञरेतसे।
तृप्तिदाय च जीवानां(न्), नमः(स्) सर्वरसात्मने॥(38)

सर्व + रसात्मने

सर्वसत्त्वात्मदेहाय, विशेषाय स्थवीयसे।
नमस्त्रैलोक्यपालाय, सहओजोबलाय च॥(39)

सर्व + सत्त्वात्म + देहाय, नमस् + त्रैलोक्य + पालाय

अर्थलिं(ङ्)गाय नभसे, नमोऽन्तर्बहिरात्मने।
नमः(फ्) पुण्याय लोकाय, अमुष्मै भूरिवर्चसे॥(40)

नमोऽन् + तर् + बहिरात्मने

प्रवृत्ताय निवृत्ताय, पितृदेवाय कर्मणे।
नमोऽधर्मविपाकाय, मृत्यवे दुःखदाय च॥(41)

नमोऽ + धर्म + विपाकाय

नमस्त आशिषामीश, मनवे कारणात्मने।
नमो धर्माय बृहते, कृष्णायाकुण्ठमेधसे।
पुरुषाय पुराणाय, सां(ङ्)ख्ययोगेश्वराय च॥ (42)

कृष्णाया + कुण्ठ + मेधसे

शक्तित्रयसमेताय, मीढुषेऽहं(ङ्)कृतात्मने।
चेतआकूतिरूपाय, नमो वाचोविभूतये॥(43)

मीढुषेऽ + हं(ङ्) + कृतात्मने

दर्शनं(न्) नो दिदृक्षूणां(न्), देहि भागवतार्चितम्।
रूपं(म्) प्रियतमं(म्) स्वानां(म्), सर्वेन्द्रियगुणाञ्जनम्॥(44)

सर्वेन्द्रिय + गुणाञ् + जनम्

स्निग्धप्रावृड्घनश्यामं(म्), सर्वसौन्दर्यसङ्ग्रहम्।
चार्वायतचतुर्बाहुं(म्), सुजातरुचिराननम्॥ (45)

स्निग्ध + प्रावृड् + घनश्यामं(म्), सर्व + सौन्दर्य + सङ्ग्रहम्

चार्वा + यत + चतुर्बाहुं(म्), सुजात + रुचिरा + ननम्

पद्मकोशपलाशाक्षं(म्), सुन्दरभ्रु सुनासिकम्।
सुद्विजं(म्) सुकपोलास्यं(म्), समकर्णविभूषणम्॥(46)

पद्म + कोश + पला + शाक्षं(म्), सम + कर्ण + विभूषणम्

प्रीतिप्रहसितापां(ङ्)ग-मलकैरुपशोभितम्।
लसत्पङ्कजकिं(ञ्)जल्क-दुकूलं(म्) मृष्टकुण्डलम्॥(47)

प्रीति + प्रहसिता + पाङ्ग, मलकै + रुप + शोभितम्, लसत् + पङ्कज + किञ्जल्क

स्फुरत्किरीटवलय-हारनूपुरमेखलम्।
शङ्खचक्रगदापद्म-मालामण्युत्तमर्द्धिमत्॥(48)

स्फुरत् + किरीट + वलय, हार + नूपुर + मेखलम्

शङ्ख + चक्र + गदा + पद्म,माला + मण्युत्त + मर्द्धिमत्

सिं(व्)हस्कन्धत्विषो बिभ्रत्-सौभगग्रीवकौस्तुभम्।
श्रियानपायिन्या क्षिप्त-निकषाश्मोरसोल्लसत्॥(49)

सिं(व्)ह + स्कन्धत् + विषो , सौभग + ग्रीव + कौस्तुभम्, निकषाश् + मोर + सोल्लसत्

पूररेचकसं(व्)विग्न-वलिवल्गुदलोदरम्।
प्रतिसं(ङ्)क्रामयद्विश्वं(न्), नाभ्याऽऽवर्तगभीरया॥(50)

पूर + रेचक + संविग्न, वलिवल् + गुद + लोदरम्

प्रतिसं(ङ्)क्रा + मयद् + विश्वन्, नाभ्याऽऽ + वर्त + गभीरया

श्यामश्रोण्यधिरोचिष्णुर्-दुकूलस्वर्णमेखलम्।
समचार्वङ्घ्रिजङ्घोरु-निम्नजानुसुदर्शनम्॥(51)

श्याम + श्रोण्य + धिरो + चिष्णुर्, दुकूल + स्वर्ण + मेखलम्

सम + चार्वङ् + घ्रिजङ् + घोरु, निम्न + जानु + सुदर्शनम्

पदा शरत्पद्मपलाशरोचिषा,
नखद्युभिर्नोऽन्तरघं(म्) विधुन्वता।
प्रदर्शय स्वीयमपास्तसाध्वसं(म्),
पदं(ङ्) गुरो मार्गगुरुस्तमोजुषाम्॥(52)

शरत् + पद्म + पलाश + रोचिषा, नख + द्युभिर् + नोऽन्तरघं(म्)

स्वी + यम + पास्त + साध्वसं(म्), मार्ग + गुरुस् + तमो + जुषाम्

एतद्रूपमनुध्येय-मात्मशुद्धिमभीप्सताम्।
यद्भक्तियोगोऽभयदः(स्), स्वधर्ममनुतिष्ठताम्॥(53)

एतद् + रूपमनु + ध्येय, मात्म + शुद्धि + मभीप् + सताम्

यद् + भक्तियोगोऽ + भयदः(स्), स्वधर्म + मनु + तिष्ठताम्

भवान् भक्तिमता लभ्यो, दुर्लभः(स्) सर्वदेहिनाम्।
स्वाराज्यस्याप्यभिमत, एकान्तेनात्मविद्गतिः॥(54)

स्वा + राज्यस् + याप्य + भिमत ,एकान्ते + नात्म + विद्गतिः

तं(न्) दुराराध्यमाराध्य, सतामपि दुरापया।
एकान्तभक्त्या को वाञ्छेत्-पादमूलं(म्) विना बहिः॥(55)

दुरा + राध्य + माराध्य

यत्र निर्विष्टमरणं(ङ्), कृतान्तो नाभिमन्यते।
विश्वं(म्) विध्वं(व्)सयन् वीर्य-शौर्यविस्फूर्जितभ्रुवा॥(56)

निर् + विष्ट + मरणं(ङ्), शौर्य + विस्फूर् + जित + भ्रुवा

क्षणार्धेनापि तुलये, न स्वर्गं(न्) नापुनर्भवम्।
भगवत्सं(ङ्)गिसं(ङ्)गस्य, मर्त्यानां(ङ्) किमुताशिषः॥(57)

क्षणार् + धेनापि, भगवत् + सं(ङ्)गि + सं(ङ्)गस्य ,किमुता + शिषः

अथानघाङ्घ्रेस्तव कीर्तितीर्थयो-
रन्तर्बहिः(स्)स्नानविधूतपाप्मनाम्।
भूतेष्वनुक्रोशसुसत्त्वशीलिनां(म्),
स्यात्सं(ङ्)गमोऽनुग्रह एष नस्तव॥(58)

अथान + घाङ् + घ्रेस् + तव, रन्तर् + बहिः(स्) + स्नान + विधूत + पाप्मनाम्

भूतेष्व + नुक्रो + शसुसत्त्व + शीलिनां(म्), स्यात् + सं(ङ्)ग + मोऽनुग्रह

न यस्य चित्तं(म्) बहिरर्थविभ्रमं(न्),
तमोगुहायां(ञ्) च विशुद्धमाविशत्।
यद्भक्तियोगानुगृहीतमं(ञ्)जसा,
मुनिर्विचष्टे ननु तत्र ते गतिम्॥(59)

बहि + रर्थ + विभ्रमं(न्) ,यद् + भक्तियोगा + नुगृहीत + मं(ञ्)जसा, मुनिर् + विचष्टे

यत्रेदं(म्) व्यज्यते विश्वं(म्), विश्वस्मिन्नवभाति यत्।
तत् त्वं(म्) ब्रह्म परं(ञ्) ज्योति - राकाशमिव विस्तृतम्॥(60)

विश्वस् + मिन् + नवभाति

यो माययेदं(म्) पुरुरूपयासृजद्
बिभर्ति भूयः(ह्) क्षपयत्यविक्रियः।
यद्भेदबुद्धिः(स्) सदिवात्मदुः(स्)स्थया
तमात्मतन्त्रं(म्) भगवन् प्रतीमहि॥(61)

पुरु + रूपया + सृजद्, क्षप + यत्य + विक्रियः

सदि + वात्म + दुः(स्)स्थया, तमात्म + तन्त्रं(म्)

क्रियाकलापैरिदमेव योगिनः(श्)
श्रद्धान्विताः(स्) साधु यजन्ति सिद्धये।
भूतेन्द्रियान्तः(ख्)करणोपलक्षितं(म्)
वेदे च तन्त्रे च त एव कोविदाः॥(62)

क्रिया + कलापै + रिदमेव, भूतेन्द्रि + यान्तः(ख्) + करणो + पलक्षितं(म्)

त्वमेक आद्यः(फ्) पुरुषः(स्) सुप्तशक्ति-

स्तया रजः(स्)सत्त्वतमो विभिद्यते।

महानहं(ङ्) खं(म्) मरुदग्निवार्धराः(स्)

सुरर्षयो भूतगणा इदं(म्) यतः॥ (63)

मरु+ दग्नि+ वार्धराः(स्)

सृष्टं(म्) स्वशक्त्येदमनुप्रविष्टश्-

चतुर्विधं(म्) पुरमात्मां(व्)शकेन।

अथो विदुस्तं(म्) पुरुषं(म्) सन्तमन्त–

र्भुङ्क्ते हृषीकैर्मधु सारघं(म्) यः॥(64)

स्व + शक्त्ये + दम + नुप्रविष्टश् ,पुर + मात्मां(व्) + शकेन , हृषी + कैर् + मधु

स एष लोकानतिचण्डवेगो

विकर्षसि त्वं(ङ्) खलु कालयानः।

भूतानि भूतैरनुमेयतत्त्वो

घनावलीर्वायुरिवाविषह्यः॥(65)

लोका + नति + चण्ड + वेगो ,भूतै + रनुमेय + तत्त्वो ,

घना + वलीर् + वायुरिवा + विषह्यः

प्रमत्तमुच्चैरितिकृत्यचिन्तया

प्रवृद्धलोभं(म्) विषयेषु लालसम्।

त्वमप्रमत्तः(स्) सहसाभिपद्यसे

क्षुल्लेलिहानोऽहिरिवाखुमन्तकः॥(66)

प्रमत्त + मुच्चै + रिति + कृत्य + चिन्तया , क्षुल्ले + लिहानोऽ + हिरिवाखु + मन्तकः

कस्त्वत्पदाब्जं(म्) विजहाति पण्डितो
यस्तेऽवमानव्ययमानकेतनः।
विशङ्कयास्मद्गुरुरर्चति स्म यद्
विनोपपत्तिं(म्) मनवश्चतुर्दश॥(67)

कस् + त्वत् + पदाब्जं(म्) ,यस्तेऽ + वमान + व्ययमान + केतनः
विशङ्कया + स्मद् + गुरुरर् + चति, विनोप + पत्तिं(म्), मनवश् + चतुर्दश

अथ त्वमसि नो ब्रह्मन्, परमात्मन् विपश्चिताम्।
विश्वं(म्) रुद्रभयध्वस्त-मकुतश्चिद्भया गतिः॥(68)

विपश् + चिताम्, रुद्र + भय + ध्वस्त, मकुतश् + चिद् + भया

इदं(ञ्) जपत भद्रं(म्) वो, विशुद्धा नृपनन्दनाः।
स्वधर्ममनुतिष्ठन्तो, भगवत्यर्पिताशयाः॥(69)

स्वधर्म + मनु + तिष्ठन्तो ,भगवत् + यर् + पिताशयाः

तमेवात्मानमात्मस्थं(म्), सर्वभूतेष्ववस्थितम्।
पूजयध्वं(ङ्) गृणन्तश्च, ध्यायन्तश्चासकृद्धरिम्॥(70)

तमे + वात्मा + नमात् + मस्थं(म्), सर्व + भूतेष्व + वस्थितम्, ध्यायन्तश् + चासकृद् + धरिम्

योगादेशमुपासाद्य, धारयन्तो मुनिव्रताः।
समाहितधियः(स्) सर्व, एतदभ्यसतादृताः॥(71)

योगा + देश + मुपा + साद्य, समा + हित + धियः(स्) ,एत + दभ्य + सता + दृताः

इदमाह पुरास्माकं(म्), भगवान् विश्वसृक्पतिः।
भृग्वादीनामात्मजानां(म्), सिसृक्षुः(स्) सं(व्)सिसृक्षताम्॥(72)

भगवान् + विश्व + सृक्पतिः, भृग्वादी + ना + मात्म + जानां(म्), सं(व्)सि + सृ + क्षताम्

ते वयं(न्) नोदिताः(स्) सर्वे, प्रजासर्गे प्रजेश्वराः।
अनेन ध्वस्ततमसः(स्), सिसृक्ष्मो विविधाः(फ्) प्रजाः॥(73)

ध्वस्त + तमसः(स्)

अथेदं(न्) नित्यदा युक्तो, जपन्नवहितः(फ्) पुमान्।
अचिराच्छ्रेय आप्नोति, वासुदेवपरायणः॥(74)

जपन्न + वहितः(फ्), अचिरा + च्छ्रेय, वासुदेव + परायणः

श्रेयसामिह सर्वेषां(ञ्), ज्ञानं(न्) निः(श्)श्रेयसं(म्) परम्।
सुखं(न्) तरति दुष्पारं(ञ्), ज्ञाननौर्व्यसनार्णवम्॥(75)

श्रेयसा + मिह, ज्ञान + नौर् + व्यस + नार्णवम्

य इमं(म्) श्रद्धया युक्तो, मद्गीतं(म्) भगवत्स्तवम्।
अधीयानो दुराराध्यं(म्), हरिमाराधयत्यसौ॥(76)

भगवत् + स्तवम्, दुरा + राध्यं(म्), हरि + मारा + धयत् + यसौ

विन्दते पुरुषोऽमुष्मा - द्यद्यदिच्छत्यसत्वरम्।
मद्गीतगीतात्सुप्रीताच्-छ्रेयसामेकवल्लभात्॥(77)

पुरुषोऽ + मुष्मा , द्यद्यदिच् + छत्य + सत्वरम्

मद्गीत + गीतात् + सुप्रीताच् , छ्रेय + सामेक + वल्लभात्

इदं(म्) यः(ख्) कल्य उत्थाय, प्राञ्जलिः(श्) श्रद्धयान्वितः।
शृणुयाच्छ्रावयेन्मर्त्यो, मुच्यते कर्मबन्धनैः॥(78)

शृणु + याच् + छ्राव + येन् + मर्त्यो

गीतं(म्) मयेदं(न्) नरदेवनन्दनाः(फ्)
परस्य पुंसः(फ्) परमात्मनः(स्) स्तवम्।
जपन्त एकाग्रधियस्तपो महच्-
चरध्वमन्ते तत आप्स्यथेप्सितम्॥(79)

नरदेव + नन्दनाः ,एका + ग्रधियस् + तपो, महच् + चर + ध्वमन्ते , आप्स्य + थेप् + सितम्

॥ इति श्रीमद्भागवते महापुराणे पारमहं(व्)स्यां(म्) सं(व्)हितायां(ञ्)
चतुर्थस्कन्धे रुद्रगीतं(न्) नाम चतुर्विंशोऽध्यायः॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

